Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४८५

Title गायत्री पुरश्चरण प्रयोगः

Author ×

Extent १२ Age सं. १८१६

Subject (धर्मशास्त्र) तन्त्रम्

गायत्रीपुरश्चरणप्रयोगः शारदातिलकानुसारी

४४८५

4485

F. = 12

ॐ यन्त्रीहलगता युधानां स्थि-
तिक्रमः अयम्

कपाल — कमल

चक्र — शंख

पाश — कपाल

केट कशा — अङ्कुश

डा अभय — वर

विष्णु

श्रीगणेशाय नमः ॥ अथ गायत्रीपुरश्चरणे प्रयोगः ॥ तत्राधिकारसिद्ध्यर्थं यथाशक्ति प्राय
श्चित्तं कृत्वा करिष्यमाणपुरश्चरणपूर्वांगत्वेन विहितं गायत्र्यादिजपं करिष्ये ॥ इति सं
कल्प्य सप्रणवव्याहृतिगायत्र्या अयुतजपं कृत्वा आपोहिष्ठेति सूक्तं एतोन्विंद्रमिति त्रि
कृचः कृत्वं च सत्यमिति सूक्तं स्वस्ति न इ त्याद्याः स्वस्तिमतीः स्यादिष्टयेत्याद्याः पाव
मानीश्च सर्वा जपेत् ॥ ततस्तत्सवितुरित्यस्य आचार्यविश्वामित्रऋषिं तर्पयामि ॥ गाय
त्रीछन्दस्तर्पयामि ॥ सवितारं देवतां तर्पयामि ॥ इति तर्पणं कृत्वा ॥ कद्रुद्रायेति रुद्रसूक्ता
नि जपेत् ॥ ततः ॥ शुभमुहूर्ते स्नातः कृतनित्यक्रियः पवित्रपाणिराचम्य प्राणानायम्य देशका
लौ संकीर्त्य अमुकशर्मणो मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं चतुर्विंशति
लक्षजपात्मकं गायत्रीपुरश्चरणं करिष्ये अशक्तौ ब्राह्मणद्वारा चरिष्ये तदंगत्वेन निर्विघ्न १

तासिध्यर्थं गणपतिपूजनं स्वस्तिवाचनं नांदीश्राद्धं आचार्यादिवरणं यथाविभवं तत्पूजनं च
करिष्ये॥ इति संकल्प्य॥ स्वकर्त्रे के ब्राह्मणवरणाद्यभावः ततो गणपतिपूजनादि नांदीश्रा
द्धांतं कुर्यात्॥ तत्र प्रजापतिः प्रीयतामित्यस्य स्थाने सविता प्रीयतामिति विशेषः॥ तत
आचार्यं वृणात् जपकर्तारं त्वां वृणे इति प्रसेकं जपकर्तृ ब्राह्मणवरणं तायथाविभवमा
सनवस्त्रालंकारचंदनादिभिः पूजयेत्॥ तत आचार्यो देशकालौ स्मृत्वा यजमान वृ
तोहमाचार्यकर्म करिष्ये इत्युक्त्वा यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा॥ स्थानं त्य
क्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥ इति सर्षपान्विकीर्य अपसर्पंतु ते भूता ये भूता भूमिसं
स्थिताः ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो
दिशं॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे इति पठेत्॥ ततः सूर्यः सोमो यमः कालः सं

ध्येम ताान्यहः क्षपा ॥ पवनो दिक्पतिर्भूमिराकाशः खेचरामराः ब्राह्मं शासनमास्थाय कल्प
ध्वमिह सन्निधिमिति देवताः प्रार्थयेत् ॥ गुरवे॰ गणपतये॰ दुर्गायै॰ मातृभ्यो नम इति नत्वा
मूलमंत्रेण कृत्वा प्राणप्रतिष्ठामातृकान्यासान्विधाय ऋष्यादिन्यासान्कुर्यात् ॥ यथा ॥ ब्रह्मणे ऋष
ये नमः शिरसि देवीगायत्र्यै छंदसे नमः मुखे ॥ परमात्मने देवतायै नमः हृदि ॥ पुनः ॥ जमद
ध्य ५ ग्निभरद्वाजभृगुगौतमकश्यपविश्वामित्रवसिष्ठेभ्य ऋषिभ्यो नमः शिरसि ॥ गायत्र्युष्णिग
नुष्टुप्बृहतीपंक्तित्रिष्टुप्जगतीभ्यश्छंदोभ्यो नमः मुखे ॥ अग्निवाय्वादित्यबृहस्पतिवरु
2 णेन्द्रविश्वेभ्यो देवेभ्यो देवताभ्यो नमः हृदि ॥ पुनः विश्वामित्राय ऋषये नमः शिरसि ॥ गाय
त्र्यै छंदसे नमः मुखे ॥ सवित्रे देवतायै नमः हृदि पुनः ॥ ब्रह्मणे ऋषये नमः शिरसि ॥ देवीगा
यत्र्यै छंदसे नमः मुखे ॥ परमात्मने देवतायै नमः हृदये इति विन्यस्य प्राणायामत्रयं कृ 

त्राविश्वामित्रऋषयेनमः शिरसि ॥ गायत्रीछंदसेनमः मुखे ॥ सवित्रेदेवतायेनमः हृदि इ
तिविन्यस्य ओंब्रह्मणेनमः नाभौ ॐ विष्णवेनमः हृदि ॥ सांशिवायनमः मूर्ध्नि ॥ इतिप्रणवन्या
सः ॥ ओंभूः नमः हृदि ॥ ॐ भुवः नमः मुखे ॥ ॐ स्वः नमः दक्षांसे ॥ ॐ महः नमः वामांसे ॥ ॐ जनः
नमः दक्षोरौ ॥ ॐ तपः नमः वामोरौ ॥ ॐ सत्यं नमः ॥ जठरे ॥ इतिव्याहृतिन्यासः ॥ ॐ तं नमः पादद्व
यांगुलिमूलेषु ॥ ॐ सं नमः उंगुल्फयोः ॥ ॐ विं नमः जान्वोः ॥ ॐ तुः नमः पादमूलयोः ॥ ॐ वं न
मः लिंगे ॥ ॐ रें नमः नाभौ ॥ ॐ णिं नमः हृदि ॥ ॐ यं नमः कंठे ॥ ॐ भं नमः ॥ करद्वयांगुलिमूले
षु ॥ ॐ र्गों नमः मणिबंधयोः ॐ दें नमः कूर्परयोः ॐ वं नमः बाहुद्वयमूलयोः ॐ स्यं नमः मुखे
ॐ धीं नमः नासिकायां ॐ मं नमः कपोलयोः ॐ हिं नमः अक्ष्णोः ॐ धिं नमः कर्णयोः ॐ यों नमः
भ्रुवोः ॥ ॐ यों नमः शिरसि ॥ ॐ नः नमः पश्चिमवक्त्रे चूडायां ॥ ॐ प्रं नमः उत्तरवक्त्रे वामकर्णे

मस्तके

ॐ चों नमः दक्षिणवक्त्रे दक्षकर्णे ॥ ॐ दं नमः पूर्ववक्त्रे मुखे ॥ ॐ यां नमः ॥ ऊर्ध्ववक्त्रे शिरसि ॥
इति वर्णन्यासः ॥ ॐ तत् नमः शिरसि ॐ सवितुः नमः ॥ भ्रूमध्ये ॐ वरेण्यं नमः नेत्रयोः ॐ भ
र्गः नमः मुखे ॐ देवस्य नमः कण्ठे ॥ ॐ धीमहि नमः हृदि ॥ ॐ धियः नमः नाभौ ॥ ॐ यः नमः गुह्ये
ॐ नः नमः जानुनोः ॥ ॐ प्रचोदयात् नमः पादयोः ॥ इति पदन्यासः ॥ ॐ आपो ज्योती रसोऽमृ
तं ब्रह्म भूर्भुवः स्वरोम् शिरसि ॥ इति शिरोन्यासः ॥ ब्रह्मणे अंगुष्ठाभ्यां नमः ॥ विष्णवे तर्जनी
भ्यां स्वाहा ॥ रुद्राय मध्यमाभ्यां वषट् ॥ ईश्वराय अनामिकाभ्यां हुं सदाशिवाय कनिष्ठिका
भ्यां वौषट् ॥ सर्वात्मने करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादौ ॥ पार्देऽयं दर्शो नु सर्वात्मने स्मात्तमि
ति आत्मनेपदयोगो ग्रन्थकृतः सर्वत्राभिप्रेतः ॥ तथा च ब्रह्मात्मने हृदयाय नम इत्यादि ॥ सौ
प्रदायिकास्तु ॥ ॐ भूर्भुवः स्वः तत्सवितुर्ब्रह्मात्मने हृदयाय नमः ॥ वरेण्यं विष्ण्वात्मने शिरः ॥ २

६

भर्गो देवस्य रुद्रात्मने शिखा ॥ धीमहि ईश्वरात्मने कवचं ॥ धियो यो नः सदाशिवात्मने नेत्रं ॥ प
चोदयात् सर्वात्मने अस्त्रं ॥ कल्पांतरे तु ॥ ब्रह्मा विष्णुः क्रमाद्रुद्र ईश्वरश्च सदाशिवः ॥ सर्वात्मा
तेजसे ते च व्याहृत्यादि षडंगकं ॥ ॐ भूः ब्रह्मतेजसे हृदयं इत्यादि ॥ आदिपदात् व्याहृतित्रयं
इत्युक्तं ॥ ततः प्रणवव्याहृतिसहितगायत्र्या त्रिर्व्यापकं कृत्वा ध्यानं ॥ मुक्ताविद्रुमहेमनीव
धवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकां ॥ सावित्रीं व
रदाभयांकुशकशाः शुभ्रं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे ॥ आशा
अश्वादेस्ताडनी रज्जुः शुभ्रमिति कपालं विशेषणं गुणं ॥ पाशं ॥ एवं ध्यात्वा ॥ लं पृथिव्यात्म
कं गंधं कल्पयामि ॥ हं आकाशात्मकं पुष्पं ॥ यं वाय्वात्मकं धूपं ॥ रं वह्न्यात्मकं दीपं ॥ वं अबा
त्मकं नैवेद्यं ॥ दशवारं मूलं प्रजाप्य एवं मनसा संपूज्य बाह्यपूजां कुर्यात् ॥ त्रिकोणाष्टद

लभूपुरात्मकं यंत्रं ॥ पादार्थदर्शीयंतु ॥ त्रिगुणितविलसद्वृत्तकं सर्वतोभद्रमंडलं चतुरस्र
युतं यंत्रं त्रिकोणस्य शारदस्य त्रिगुणितोपलक्षकत्वात् प्रपंचसारे तथैवोक्तेरित्युक्तं ॥ केचित्तु ॥
त्रिगुणितत्रिकोणोज्ज्वलवृत्तिकमष्टदलं च चतुरस्रयुतं यंत्रमाहुः ॥ यथासंप्रदायं यंत्रं संपा
द्य तत्र सौरं पीठं पूजयेत् ॥ यथा ॥ मंडूकाय नमः ॥ कालाग्निरुद्राय नमः ॥ आधारशक्त्यै
नमः ॥ कूर्माय नमः ॥ धरायै नमः ॥ अमृतसागराय नमः ॥ श्वेतद्वीपाय नमः ॥ कल्पवृक्षे
भ्यो नमः ॥ माणिहर्म्याय नमः ॥ हेमपीठाय नमः ॥ इति संपूज्य ॥ आग्नेयादिकोणेषु प्रभू
ताय नमः ॥ विमलाय न ॥ साराय न ॥ समाराध्याय न ॥ मध्ये परमसुखाय नमः ॥ ततो मध्ये ॥
एवं अनंताय न ॥ पद्माय न ॥ आनंदमयकंदाय नमः ॥ संविन्नालाय नमः ॥ विकारमयकेसरे
भ्यो नमः ॥ प्रकृत्यात्मकपत्रेभ्यो नमः ॥ पंचाशद्वर्णकर्णिकायै नमः ॥ इंदुमंडलाय न ॥ वह्निमं ७

उत्कलाय नमः। सूर्यमंडलाय नमः। एवं पीठदेवतां संपूज्य॥ पीठशक्तीः पूजयेत्॥ यथा॥ रां दीप्ता
यै नमः। रीं सूक्ष्मायै नमः। रूं जयायै नमः। रें भद्रायै नमः। रैं विभूत्यै०। रों विमलायै०॥ रौं अमोघा
यै०। रं विद्युतायै०। रः सर्वतोमुख्यै नमः॥ स्वपुरत आरभ्याष्टदिक्षु मध्ये च पूजयेत्॥ ततः ब्र
ह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः॥ इति पीठं संपूज्य॥ पीठकर्णिकायामादिसंॐ
खं खखोल्काय नमः इति मंत्रेण पूजयेत्॥ ततः स्ववामे त्रिकोणषट्कोणवृत्तचतुरस्रात्मकं
यंत्रं विलिख्य तत्रास्त्रक्षालितमाधारं संस्थाप्य मं दशकलात्मने वह्निमंडलाय गायत्र्यर्घ्य
पात्राधाराय नमः॥ इति आधारं संपूज्य॥ अस्त्रक्षालितं पात्रं संस्थाप्य अं द्वादशकलात्मने सूर्य
मंडलाय गायत्र्यर्घ्यपात्राय नमः इति पात्रं संपूज्य क्षं लं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं
णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं इति वि

गं०

ओं मम मातृकां । गायत्रीं च पठन् जलं संपूर्य उं षोडशकलात्मने चंद्रमंडलाय गायत्र्या अर्घ्यपा
त्रामृताय नमः ॥ इति जलं संपूज्य गंगे च यमुने चैवेत्यादिमंत्रेण अंकुशमुद्रया जले तीर्थान्या
वाह्य हृदयादिवं चावाह्य षडंगमंत्रैरभ्यर्च्य शंखचक्रमुशलधेनुयोनिमुद्राः ॥ संदर्श्य म-
त्स्यमुद्रया छाद्य अष्टवारं मूलमंत्रं जपेत् ॥ अर्घोदकेनात्मानं पूजासाधनानि च त्रिः प्रोक्षे
त् ॥ ततः पीठात्मनो मध्ये विशेषार्घ्यस्थापनं ॥ सामान्यार्घ्यवत् ॥ केचित्तु ॥ अर्घ्यस्थापनोत्त
रं पीठपूजां कुर्वंति ॥ ततः गायत्र्या यंत्रे मूर्तिं परिकल्प्य पूर्वोक्तब्रह्मादिरूपादीप्तलाम्रा
णनाय म्य हृत्कमले चित्कलारूपां वक्ष्यमाणावरणसहितां ध्यात्वा । मनसा पुष्पांजलिं
दत्वा हस्ते पुष्पांजलिं गृहीत्वा गायत्रीमंत्रेण वहन्नासापुटरंध्रेण बहिरानीय पुष्पसं
चये संयोज्य तत्र सावरणां ध्यातां यंत्रकल्पितमूर्तौ निवेश्य आवाहनादिमुद्राः ॥ ५

5

प्रदर्शयेत्॥ आवाहिता भव॥ स्थापिता भव॥ सन्निहिता भव॥ संनिरुद्धा भव॥ संमुखीकृता भव॥ सकलीकृता भव॥ अवगुण्ठिता भव॥ अमृतीकृता भव॥ परमीकृता भव॥ ततः प्राणप्रतिष्ठां कुर्यात्॥ यथा॥ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः गायत्र्याः प्राणा इह प्राणाः॥ आं ह्रीं क्रों इत्यादि हंसः इत्यंतमुक्त्वा गायत्र्या जीव इह स्थितः पुनः आं ह्रीं क्रों हंसः गायत्र्याः सर्वेन्द्रियाणि पुनः आं ह्रीं क्रों हंसः गायत्र्या वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥ इति मंत्रेण त्रिरावृत्त्या प्राणान्प्रतिष्ठाप्य ध्यायेत्॥ मुक्ताविद्रुमेत्यादि श्लोकोक्तस्वरूपां ध्यात्वा मंत्रेण पाद्यादिपुष्पांतानुपचारान्कृत्वा पुष्पांजलिं दत्वा प्रसन्नां विभाव्य तदाज्ञया आवरणपूजां कुर्यात्॥ गायत्र्यै नमः॥ सावित्र्यै नमः॥ सरस्वत्यै नमः॥ त्रिकोणे स्वाग्रत आरभ्य कोणत्रये प्रादक्षिण्येन पूजयेत्॥ ब्रह्मणे नमः॥ विष्णवे नमः॥ रुद्राय नमः॥ कोण

तराले वह्निसितवस्तिवरुणेशानादिक्षु पूजयेत्॥ पुष्पांजलिं गृहीत्वा मूलमुच्चार्य अभिष्टसि
द्धिं मे देहि शरणागतवत्सले॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनमिति पुष्पांजलिं
दत्वा देव्या हस्ते जलं क्षिपेत्॥ इति प्रथमावरणं॥ आदित्याय नमः॥ रवये नमः॥ भानवे
नवे नमः॥ भास्कराय नमः॥ सूर्याय नमः॥ चूलिकायामादित्यं सम्पूज्य परिधौ चतुर्दिक्षु र
व्यादीन् पूजयेत्॥ उषायै नमः॥ प्रज्ञायै नमः॥ प्रभायै नमः॥ संध्यायै नमः॥ एता विदिक्षु प्र
स्थेन पुष्पांजलिं गृहीत्वा अभीष्टसिद्धिमित्यादि पूर्ववत्॥ द्वितीयावरणार्चनमिति विशेषः
इति द्वितीयावरणं॥ ब्रह्मणे हृदयाय नमः॥ विष्णवे शिरसे स्वाहा रुद्राय शिखायै वषट्॥ ई
श्वराय कवचाय हुं॥ वह्निसितअग्नीशासुरवायव्येषु केसरेषु संपूज्या॥ सदाशिवाय नेत्रत्र
याय वौषट्॥ इति देव्याः पुरतः संपूज्य सर्वात्मने अस्त्राय फट्॥ इति पुरतस्त्वारभ्य केसरे ६

पुच तु दिक्षु पूजयेत्॥ मूलेन पुष्पांजलिं गृहीत्वा अभीष्ट॰ तृतीयावरणार्चनं॥ इति पूर्ववत्॥ इति तृतीयावरणं॥ प्रकृत्यै दिव्यै नमः॥ प्रभायै नमः॥ नित्यायै नमः॥ विश्वंभरायै नमः॥ विलासिन्यै नमः॥ प्रभावत्यै नमः॥ जयायै नमः॥ शान्त्यै॰॥ स्वाग्रत आरभ्याष्टसु दलेषु॥ मूलेन पुष्पांजलिं गृहीत्वा॥ अभिष्टेत्यादि चतुर्थावरणार्चनमिति॥ पूर्ववत्॥ इति चतुर्थावरणं॥ कान्तायै नमः॥ दुर्गायै॥ सरस्वत्यै नमः॥ विश्वरूपायै॰॥ विशालायै॰॥ ईशायै॰॥ व्यापिन्यै॰॥ विमलायै॰॥ पूर्वत आरभ्य दलेष्वेव पूजयेत्॥ मूलेन पुष्पांजलिं गृहीत्वा अभिष्टपंचमावरणार्चनमित्यादि॥ इति पंचमावरणं॥ तमोपहारिण्यै॰॥ सूक्ष्मायै॰॥ विश्वयोन्यै॰॥ जयावहायै॰॥ पद्मालयायै॰॥ परायै॰॥ शोभायै॰॥ भद्ररूपायै॰॥ पूर्वत आरभ्य दलेष्वेव॥ मूलेन पुष्पांजलिं गृहीत्वा अभीष्ट॰॥ षष्ठमावरणार्चनमित्यादि॥ इति षष्ठमावरणं॥ ब्राह्म्यै॰॥ मा

हेश्वर्यै॰ ॥ कौमार्यै॰ वैष्णव्यै नमः ॥ वाराह्यै॰ ॥ इन्द्राण्यै॰ ॥ चामुण्डायै॰ ॥ अरुणाय नमः ॥ पुरतआ
रभ्य दलाग्रेषु पूजयेत् ॥ मूलेन पुष्पांजलिं गृहीत्वा अभिष्ट॰ सप्तमावरणार्चनमित्यादि पूर्वव
त् ॥ पद्मपादाचार्योक्तम् ॥ महालक्ष्मीमष्टमीं संपूज्य पुरतोऽरुणमर्चयेत् ॥ इति अरुणपूजाम
धिकमाहुः ॥ इति सप्तमावरणं ॥ ततो बहिः चेन्द्राय ॥ बुधाय॰ ॥ बृहस्पतये॰ ॥ शुक्राय॰ ॥ पुरत
आरभ्य चतुर्दिक्षु ॥ भौमाय॰ ॥ शनैश्चराय॰ ॥ राहवे॰ ॥ केतवे॰ ॥ विदिक्षु मूलेन ॥ पुष्पांजलिं
7 गृहीत्वा अभिष्ट॰ अष्टमावरणार्चनमित्यादि ॥ इत्यष्टमावरणं ॥ इन्द्राय नमः ॥ अग्नये न
मः यमाय नमः ॥ निर्ऋतये नमः ॥ वरुणाय नमः ॥ वायवे नमः ॥ सोमाय नमः ॥ ईशानाय॰ ॥
॥ इत्यष्टमावर्णं ॥ चतुरस्रा ॥ प्राक्सिद्धपूर्वादिक्षु ॥ अनन्ताय नमः ॥ पश्चिमनैर्ऋतमध्ये॰ ॥ ब्रह्म
णे नमः पूर्वेशानमध्ये मूलेन पुष्पांजलिं गृहीत्वा अभीष्ट॰ नवमावरणार्चनमित्यादि ॥ ॰७॥

॥ इति नवमावरणं ॥ वज्राय नमः ॥ शक्तये । दंडाय नमः । खड्गाय । पाशाय । अंकुशाय । ॥
गदायै । ॥ त्रिशूलायै । चक्राय । पद्माय । ॥ पूर्ववत्सजयेत् ॥ मूलेन पुष्पांजलिं दत्वा अभिष्टसि
द्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पयेत्तुभ्यं दशमावरणार्चनमिति देव्या हस्ते जलं
दद्यात् ॥ इति दशमावरणं ॥ ततः अवशिष्टपूजां समाप्य पुष्पांजलिं दत्वा देवीं प्रसन्नां विभा
व्य स्वात्मानं देवीस्वरूपं ध्यात्वा सपूज्य ऋष्यादिन्यासं कृत्वा देवी गुरु मंत्रात्मनां ज्योतीरूपे
णैक्यं विभावयेत् ॥ एवं यावत्स्वयोगसमाप्तिस्तावत्प्रत्यहं पूजां कुर्यात् ॥ इति पूजाविधिः
॥ अथ जपः ॥ तिथ्यादि संकीर्त्य संकल्पित पुरश्चरणसमाप्ति पर्यंतं अमुकसंख्याकजपम
हं करिष्ये ॥ इति संकल्प्य देवगुर्वादिस्मरणं विधाय प्राणायामत्रयं कृत्वा पूर्वोक्तऋष्यादि
न्यासान्कृत्वाऽङ्गशाकोपसंगमात्र विधाय देवतां ध्यायन् जपं कुर्यात् ब्राह्मणद्वारा करणेतु

यजमानवृतो ब्राह्मण एकैकः शुद्धदेहो कुशाद्यासने उपविश्य पवित्रपाणिराचम्य प्राणा
गायम्य आसनविधिमन्त्रोच्चारणादिकलशमूलशुद्धिप्राणप्रतिष्ठामातृकान्यासान्वि
धाय जपं संकल्प्य त्रिःप्राणानायम्य ऋष्यादिस्मरणपूर्वकं ऋष्यादिन्यासान्विधाय स
वितारं देवतां ध्यात्वा संस्कृतां मालां प्रोक्ष्य ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ॥ चतु
र्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ ह्रीं अक्षमालायै नमः ॥ इति संप्रार्थ्य ॐ अ
विघ्नं कुरु माले त्वं जपकाले सदा मम ॥ त्वं बीजं सर्वमन्त्राणामिष्टसिद्धिकरी च वै इति ता
मादाय हृदयसामीप्ये मालां धारयन् मध्यमामध्यपर्वणि निधायोन्नतगात्रः स्वदृष्
टा दिशा द्रुमकुर्वन् मध्याह्निनावधि त्वरायां सार्धप्रहरत्रयपर्यन्तं जपेत् ॥ अन्ते पुनः
प्रणवमुच्चार्य त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव ॥ शिवं कुरुष्व मे भद्रे यशो वीर्यं

च सर्वदा ॥ ह्रीं सिद्ध्यै नमः ॥ इति मालां शिरसि निधाय गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्म-
त्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादाद्धृदि स्थिता ॥ इति जपसमर्पणं ॥ पुनर्न्यासान्कुर्यात्
॥ इति जपविधिः ॥ एवं समाप्ते जपे तिथ्यादि संकीर्त्य एतेन गायत्रीपुरश्चरणे सांगतासि-
द्ध्यर्थं होमं करिष्ये इति संकल्प्य यथाचारं गणपतिपूजनादिकं साकल्पिकसदस्यादिव-
रणं तु कुर्यात् ततो यथोक्तविधिना अग्निं प्रतिष्ठाप्य ग्रहावाहनादिकं कलशस्थापनान्तं
कृत्वास्य माले गायत्रीपुरश्चरणे होमे देवतापरिग्रहार्थमन्वाधानं करिष्ये इति संक-
ल्प्यास्मिन्नन्वाहितेग्नौ सवित्रादि चक्षुषी आज्येनेत्यन्ते अत्र प्रधानं आदित्यादिग्रहा-
न् अर्कादिजातीयसमिदाहुतिभिश्च चर्वाज्याहुतिभिश्चामुकसंख्याकाभिः पुनरत्र
प्रधानं सवितारं सहस्रत्रयसंख्याकाभिर्दुग्धाभिश्चौदनाहुतिभिस्तावतीभिस्तिला-

हुतिभिस्तावतीभिर्दूर्वाभिस्तावतीभिरर्कसमिद्भिस्तावतीभिरश्वत्थसमिद्भिस्तावतीभि
र्वटसमिद्भिस्तावतीभिरुदुंबरसमिद्भिस्तावतीभिः प्लक्षसमिद्भिरावरणदेवताश्चै
केकयाघृताक्ततिलाहुत्याशेषेण साध्य। पर्यग्निकरणकाले च वोढिभिः सहाज्यस्य
पर्यग्निकरणं॥ यथान्वाधानकाले इदं सवित्रादिभ्यो न मम। इदं सवित्रे इत्येवं त्या
गः॥ दूर्वात्रयस्यैकाहुतिः॥ काले बालिनौ दोदिप्रणी कुर्यात्तन्त्रशेषं समाप्य समुद्र
ज्येष्ठादस्याभिषेकान्ते प्रत्येकं धेनुनिष्क्रयसंकल्पः॥ विसर्जनादि ब्राह्मणभोजनं सं
कल्पान्ते कर्म ईश्वरार्पणं कुर्यात्॥ पदार्थादर्शे तु॥ क्षीरं॥ ओदनं॥ तिलाः॥ दूर्वाः॥ इ
तिद्रव्यचतुष्टयं॥ क्षीरद्रुमाश्चाश्वत्थोदुंबरप्लक्षवटाः एवमष्टद्रव्याणि प्रत्येकं त्रित्रि
सहस्रं इत्युक्तं॥ प्रपंचसारे तु॥ पायसघृततिलदूर्वाक्षीरद्रुमचतुष्टयं एवमष्टौ उक्ता ९

नि॥ इति होमविधी॥ एवं होमं समाप्य जले देवं संपूज्य होमदशांशेन गायत्र्यं तेसविता
रं तर्पयामि नमः इति तर्पणं कार्यं॥ तर्पणाद्दशांशेन गायत्र्यं ते आत्मानमभिषिंचामि नम
इति स्वमूर्ध्नि मार्जनं कार्यं॥ असंभवे द्विगुणो जपः। यद्यदंगं विहीयेत तस्य तस्या द्विगुणो ज
प इति वचनात्॥ अभिषेकदशांशेन ब्राह्मणभोजनं। अशक्तौ। शक्त्यनु यथेष्ठं ब्राह्मण
भोजनं कुर्यात्॥ ब्राह्मणभोजनेनैव देवता प्रसीदति॥ ब्राह्मणान्दक्षिणादिभिस्तोष
यित्वाशिषो गृहीत्वा पुरश्चरणं पूर्णमस्त्विति वाचयित्वा कर्मैश्वरार्पणं कुर्यात्॥ आ
रंभप्रभृति यावत्समाप्ति कर्त्ता ब्राह्मणैः सह हविष्याशी सत्यवाग्धः शायी भवेत्॥
यज्ञोपवीत इति शिवसंकल्पमंत्रांस्त्रिः पठित्वा प्रत्यहं शयीत॥ अथ मालासंस्कारः॥ कु
शोदकसहितैः पंचगव्यैर्मालां प्रक्षाल्य अं आं इत्यादीनि क्षं इत्यंतानि मातृकाक्षरा

ऐं अष्टदलाकारतया स्थापितेषु नवसु अश्वत्थपत्रेषु स्थापितमालायां विन्यस्य ॐ स
द्योजातं ॐ वामदेवाय ॐ अघोरेभ्यः ॐ तत्पुरुषाय ॐ ईशानः ॥ इति पंचमंत्रान्ज
पित्वा एतेषां मध्ये प्रथमेन पंचगव्येन शीतलजलेन च मालां प्रक्षाल्य द्वितीयेन
चंदनादिना विघृष्य ॥ तृतीयेन मालां धूपयित्वा चतुर्थेन चंदनकुसुमादिना लेप
यित्वा पंचमेन प्रतिमणि शतसहस्रं रक्षा ॥ प्रत्येकं मंत्रयेन्मंत्री पंचमेन सद्रलसवृदिति व
चनात् समभिमंत्रयेत् ॥ अघोरेभ्य इति मंत्रेण मेरुं शतवारं मालायां वा शतजपः ॥ समु
दाय मालामधिवृत्य पंचमेनैव सक्लेनशातान्मूलेन मंत्रयेदिति वचनात् समभिमंत्र्य ए
तैरेव पंचभिर्मंत्रैर्मालां पंचोपचारैरिष्टदेवतावत् पूजयेत् ॥ इति मालासंस्कारः ॥ एवं च
तुर्विंशतिलक्षजपात्मकं पुरश्चरणं मंत्रकोशादावप्युक्तं ॥ पारिजातोदाहृतेरुक्षविधा २०

नेतु॥ अथ वेदादिगीतायाः प्रसादजननं विधिं॥ गायत्र्याः। संप्रवक्ष्यामि धर्मकामा
र्थमोक्षदं॥ मध्याह्नेऽमितभुङ्मौनी त्रिःस्नानार्चनतत्परः। जपेल्लक्षत्रयं धीमान्नान्य
दृङ्मानसक्रिय॥ इति त्रिलक्षं पुरश्चरणमुक्तं कला॥ कलौ चतुर्गुणो जपो विहितः॥ अतो द्वाद
शलक्षैः पुरश्चरणं भवति॥ तत्र संकल्पस्तथैवोक्तः॥ द्वादशलक्षात्मकं पुरश्चरणं करिष्ये
इति सवितारं द्वादशसहस्रतिलाहुतिभिः संतर्पयेदिति च तन्त्रे चोक्तं॥ इति रूपणकरना
रायणभट्टात्मज श्रीवल्लभकृतः शारदातिलकानुसारी गायत्रीपुरश्चरणप्रयोगः सं
वत् १८१७ रामभूवसुभूसंख्ये वत्सरे व्ययसंज्ञके माघमासे सितपक्षे सप्तम्यां गुरुवा
सरे श्रीवल्लभो व्यचल्काश्यां पौरश्चरणकं विधिं॥ अथ मुद्रालक्षणानि॥ अनामाङ्गुष्ठसं
लग्नाङ्गुष्ठानां जनिशेरिता॥ देवाह्वानकरी चैषा मुद्रा वाहनसंज्ञिका॥१॥ अधोमुखीकृता

सैव प्रोक्ता स्थापनकर्मणि ॥ २ ॥ आश्लिष्टमुष्टियुगलप्रोन्नतांगुष्ठयुग्मका । संनिधाने
समुद्दिष्टा मुद्रेयं तंत्रवेदिभिः ॥ ३ ॥ अंगुष्ठगर्भिणी सैव संनिरोधे समीरिता ॥ ४ ॥ उत्तानमुष्टि
युगलासंमुखीकरणी मता ॥ ५ ॥ देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः ॥ ६ ॥ सव्यहस्त
कृतामुष्टिर्दीर्घाधोमुखतर्जनी ॥ अवकुंठनमुद्रेयमभितो भ्रामिता सती ॥ ७ ॥ वामांगुली
नां मध्येषु दक्षिणांगुलीरथ । नियोज्य तर्जनीं दक्षां मध्यमया वामया तथा । दक्षमध्यमया
वामां तर्जनीं च नियोजयेत् । वामयानामया दक्षां कनिष्ठां च नियोजयेत् । दक्षयानाम
या वामां कनिष्ठां विनियोजयेत् । विहिताधोमुखी चैषा धेनुमुद्रा प्रकीर्तिता ॥ ८ ॥ अन्यो
न्यग्रथितांगुष्ठा प्रसारितकरांगुली ॥ महामुद्रेयमुदिता परमीकरणे बुधैः ॥ ९ ॥ प्रयोज
येदिमां मुद्रां देवतायागकर्मणि ॥ वामांगुष्ठं तु संगृह्य दक्षहस्तस्य मुष्टिना ॥ दक्षो ११

तानं दक्षमुष्टिमंगुष्ठं तु प्रसारयेत् ॥ वामांगुल्यस्तथा श्लिष्टाः संयुक्ताः सुप्रसारिताः । दक्षि
णांगुष्ठेन तु तन्नाम्ना मुद्रा शंखस्य भूतिदा ॥ २ ॥ हस्तौ तु संमुखौ कृत्वा संलग्नौ सुप्रसारितौ ॥ क
12 निष्ठांगुष्ठकौ लग्नौ मुद्रैषा चक्रसन्निका ॥ ३ ॥ मुष्टी कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणं
॥ कुर्यान्मुसलमुद्रेयं सर्वविघ्ननिवारिणी ॥ ४ ॥ मिथः कनिष्ठिके बध्वा तर्जनीभ्यामनामि
के ॥ अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ॥ अंगुष्ठाग्रद्वयं न्यस्येद्योनिमुद्रेयमीरिता
॥ ५ ॥ वामोपरिष्टात्तस्याथ दक्षहस्तं प्रसारयेत् ॥ अंगुष्ठौ तु तयोः पार्श्वे मत्स्यमुद्रेय
मीरिता ॥ ७ ॥ इति मुद्रालक्षणानि ॥ संवत् १९१७ नामा माघ शुदि १ वार शनि ॥ श्री ॥ ॥ ॥

धर्मः

कृत्रा पैतिः

२००